दादिना साधुशब्दस्यान्यथोच्चारणसाध्ये अपभ्रंशशब्दे "त एव शक्तिवैकल्यप्रमादालसतादिभिः । अन्यथोच्चारिताः शब्दा अपशब्दा इतीरिता" इति हरिः "म्लेच्छोह्वा नाम यदपशब्दः" इति श्रुतिः ।

**अपशव्य** त्रि० पशवे हितः यत्, विरोधे न०त० । पशुवृद्धिविघातके "अपशव्येव तु वा ईश्वरा" इति ता०ब्रा० "अपशव्येव पशूनां वृद्धिविघातिनी" भा० ।

**अपशु** पु० न पशुः अप्राशस्त्ये न०त० । गोऽश्वभिन्ने पशौ । "अपशवो वा अन्ये गोऽश्वेभ्यः इति" "अपशुर्वा एष यदारण्योनैतस्य होतव्यमिति" च शत०ब्रा० । नास्ति पशुर्यस्य । पशुशून्ये "अप्रजा अपशुर्भविष्यति" । शत०ब्रा० ।

**अपशुच्** त्रि० अपगता शुक् शोकोयस्य प्रा०ब० । अपगत शोके । सर्वदाऽपेतशोके आत्मनि पु० । "क उत्तमःश्लोकगुणानुवादात् पुमान् विरज्येत विनाऽपशुग्मादिति,' भागवते पाठं प्रकल्प्य श्रीधरेण अपशुगात्मेतिव्याख्यातम् तस्य हननञ्च यथार्थेनाज्ञानं "योऽन्यथा सन्तमात्मानमन्यथा प्रतिपद्यते किं तेन न कृतं पापं ? चौरेणात्मापहारिणेति" मनुना आत्मनोऽन्यथारूपज्ञानेनैव स्वात्महन्तृत्वोक्तेः । "अन्धं तमस्ते प्रविशन्ति ये केचात्महनोजनाः" इति श्रुतिभाष्येऽपि तथैवात्माज्ञाने आत्महननमुक्तम् । अपशोकादयोऽप्यत्र त्रि० ।

**अपश्चिम** त्रि० न पश्चिमः विरोधे न०त० । अग्रिमे "कश्यपस्य महाभागस्तेषामासीदपश्चिम" इति रामा० नास्ति पश्चिमः शेषभवोयस्य । शेषशून्ये, इयत्ताशून्ये च 'अपश्चिमामिमां कष्टामापदं प्राप्तवत्यहमिति" रामा० ।

**अपश्य** त्रि० दृश-वेदे बा०श न०त० । अद्रष्टरि अदर्शके "अन्धा अपश्या न दभन्नभिख्या" इति ऋ०१,१४८,५, "अपश्या अद्रष्टारः" इति भा० लोके तु अदर्शीत्येव ।

**अपश्रय** पु० अप+श्रि-अच् । उपाश्रये "सामासाद उद्गीथोऽपश्रयः" अथ० १५,३,८, ।

**अपश्री** त्रि० अपगता श्रीर्यस्मात् श्रीःशोभादिः । शोभादिहीने ।

**अपश्लिष्ट** त्रि० अप+श्लिष-क्त । श्लेषशून्ये, संसर्गहीने, वियुक्ते च । [अपक्रम्य स्थातरि त्रि० ।

**अपष्ठ** न० अप+स्था-क अम्बा० षत्वम् । अङ्कुशाग्रे हेम० ।

**अपष्ठु** अव्य० अप+स्था-कु षामादि० षत्वम् । निर्दोषे, शोभने, विपरीते, च । "अपष्ठु पठतः पाय्यमधिगोष्ठि शठस्य ते" इति नैष० । प्रतिकूले, विरुद्धार्थे च त्रि० । काले पु० ।

**अपष्ठुर(ल)** त्रि० अप+स्था-कुरच् वा लत्वम् । प्रतिकूले हेम० । विपरीते त्रिका० ।

**अपस्** न० आप-असुन् ह्रस्वश्च । कर्म्मणि निरु० । तद्वति च । "अपसा सन्तु नेमे" ऋ० १,५४,८, अपः कर्म्म तद्वन्तोवेति भा० "ग्लास्त्वाऽकृन्तन्नपसोऽतन्वत" ता०ब्रा० । "अतृष्यन्तीरपसोयन्त्यच्छा" ऋ० ७,७१,३ "अपसा कर्म्मयुक्ता" इति भा० । प्राप्ते त्रि० । "ऋध्याम कर्म्मापसा नवेन ऋ० १,३१,८, 'अपसा प्राप्तेनेति" भा० ।

**अपसद** त्रि० अपकृष्ट इव सीदति सद-अच् । अधमे, नीचे च । "रेरे क्षत्त्रियापसदाः!" इति वेणी० । "विप्रस्य त्रिषु वर्णेषु नृपतेर्वर्णयोर्द्वयोः । वैश्यस्य वर्णे चैकस्मिन् षडेतेऽपसदाः स्मृता इति" मनूक्ते अनुलोमवर्णस्त्रीजाते वर्णसङ्करभेदे मूर्द्धावसिक्तादौ पुंस्त्री० । "ये द्विजानामपसदा ये चापध्वंसजाः स्मृता" इति मनुः ।

**अपसम** अव्य० समाया अत्ययः अव्ययी० । वत्सरात्यये तिष्ठद्गुगणपाठान्नैतस्य समासान्तरघटकता ।

**अपसर** पु० अप+सृ-भावे अच् । अपयाने, अपसरत्यस्मात् स्वत्वम् अपादाने अच् । प्रतिग्रहक्रयादौ । "निरन्वयोऽनपसरः प्राप्तःस्याच्चौरकिल्बिषमिति" मनुः । "अपसरः प्रतिग्रहक्रयादिः" कुल्लूकभट्टः ।

**अपसरण** न० अप+सृ-भावे ल्युट् । अपयाने "इतोऽवसरणमेव श्रेय इति" नाटकम् "अपसरणतोह वा अग्रे देवा जयन्तोऽजयन्" इति "दिवमेवाग्रे अथेदमन्तरिक्षमथैतोऽनपसरणात् सपत्नाननुदन्त इति च शत०ब्रा० १,६,१११ ।

**अपसर्ज्जन** न० अप+सृज-भावे ल्युट् । त्यागे, वर्ज्जने च । घञ् । अपसर्गोऽप्युक्तार्थे पु० ।

**अपसर्प** पु० अप+सृप-कर्त्तरि अच् । गुप्तचरे । "सर्पाधिराजोरुभुजोऽपसर्पं पप्रच्छ भद्रं विजितारिभद्रः" रघुः । "तयैवासर्पभूतया तत्र खड्गाखड्गशेषमचोरयावः" इति दशकु० । भावे घञ् । अपसरणे । [गमने ।

**अपसर्पण** न० अप+सृप-भावे ल्युट् । अपयाने पृष्ठतो

**अपसल** त्रि० अप+सल-कर्त्तरि अच् । अपसव्यताप्राप्ते । 'यथाबालं पुरस्कृत्य यज्ञोपवीतानि अपसलानि कृत्वा तीर्थमवतीर्य्येति" शु०त० बौधा० । "अपसलानि अपसव्यानीति शुद्धितत्त्वे रघुनन्दनः ।

**अपसलवि** अव्य० अप+सल-बा० अवि । तर्ज्जन्यङ्गुष्ठमध्यस्थानरूपे पितृतीर्थे, "तर्ज्जन्यङ्गुष्ठयोरन्तरा अपसलवि अपसव्यं वा तेन पितृभ्योनिदधाति" शु०त० गृह्यम् । "सव्येनैव पाणिना कृततन्तुं गृहीत्वा अपसलवि पूर्व्वस्यां कर्षौ पिण्डे निदध्यादिति" गोभिलः ।